अन्तर्राष्ट्रीय हिन्दी एवं सामाजिक विज्ञान शोध पत्रिका
Peer Reviewed Refereed शोध पत्रिका
ISSN: 2348–2605 Impact Factor: 6.789 Volume 11-Issue 03, (July-Sep 2023)

# वाक्यपदीयब्रह्मकाण्डोपक्रमरूपः शब्दतत्त्वविचारः

**प्रो. धनीन्द्रकुमारझा:**
**आचार्य:, व्याकरणशास्त्रविद्याशाखा:**
**केन्द्रीयसंस्कृतविश्वविद्यालय**
**लखनऊपरिसर:, लखनऊ**

अथासंदिग्धे विषये विचार: प्रवर्तितुं नार्हति, संदिग्धो न्यायः प्रवर्तत इति न्यायात् । न जातु कश्चित् सचेता भगवति सहस्ररश्मिमालिनि अम्बरतलावलम्बिनि पुरत: प्रकाशमानं घटपटादिकं विषयजातं स्फुटमाकलयन् जिज्ञासते किमिदमिति । एवमेव प्रयोजनरहितेऽपि विषये न कश्चिदनुयुङ्क्ते किमिदमिति । यथा करटस्य दन्ता भवन्ति न वा ? तस्मात् संदिग्धो सप्रयोजने च वस्तुनि विचारारम्भ इति सर्ववादिसिद्ध: सिद्वान्तः ।

अभिमतस्यार्थस्य बुबोधयिषया शब्दान् लोक: प्रयुङ्क्ते । ते च श्रोत्रेणेन्द्रियेण गृहीता गृहीतशक्तिका: शाब्दबोधासामग्रीसहिता अर्थान् बोधयन्ति । तथा च श्रोत्रेन्द्रियेणैव तत्स्वरूपग्रहणाद् न संशीतिलेशतोऽपि ।

एवञ्च स्फोटाख्यशब्दतत्वविमर्शस्य न किञ्चित् फलमुत्पश्यामि । शब्दप्रयोगस्यार्थावबोधमात्रं फलकतया तस्य श्रोत्रेन्द्रियेण ग्रहणानन्तरमुपपन्नतया तद्विचारः काकदन्तपरीक्षा इव निष्फल एव । तथा चोक्तं भामतीकृता संदिग्धमप्रयोजनञ्च न तत् प्रेक्षावत्प्रतिपित्सागोचरः" इति । तथा चात्र संशयप्रयोजनयोरभावाद् विचारो भवितुं नार्हति । सत्यम्, यद्यपि असंदिग्धं निष्प्रयोजननञ्च वस्तु न जिज्ञासास्पदम्, तथापि सामान्यतो ज्ञातेऽपि विषये विशेषरूपेण अज्ञाततया विशेषविषयिणीं जिज्ञासां को नाम निवारयितुमीहे ? मन्दान्धकारे उच्चैस्त्वेन रूपेण सामान्यतो ज्ञातेऽपि पदार्थो स्थाणुर्वा पुरुषो वेति विशेषरूपेण ज्ञातुं प्रयतते । तद्धर्मावच्छिन्नविषयकं ज्ञानं तद्धर्मावच्छिन्नविषयिणीं जिज्ञासामुपशमयति, न त्वन्यविधयां जिज्ञासाम् ; अन्यथा प्रमेयत्वेन ज्ञाते सर्वस्मिन् पदार्थे विशेष जिज्ञासानुदयात् सर्वेषां शास्त्राणामनारम्भः समेषां च सार्वज्ञ्यं प्रसज्येत ।

तथाहि - "प्रतीतपदार्थको लोके ध्वनिः शब्दः" इत्युच्यते । तद्यथा - "शब्दं कुरू, शब्दं मा कार्षीः, शब्दकारी अयं माणवक!" इति ध्वनिं कुर्वन्नेवमुच्यत इति महाभाष्य उक्तम् । "तपरस्तत्कालस्य" इति सूत्र तु स्फोट: शब्दो ध्वनिः शब्दगुण इत्युक्तम् ।

ध्वनि: शब्दगुण इत्यस्यायमभिप्रायः - ध्वनिः शब्दोपकारको व्यञ्जकतया न, स्वयं शब्द इति । एवंरूपेण विरुधार्थप्रतिपादनेन विप्रतिपत्तिमूलक: संशयो निराबाध: ।

"एकः शब्दः सम्यग् ज्ञात: सुष्ठ प्रयुक्तः स्वर्गे लोके च कामधुग् भवति"[1] इत्यादिना महाभाष्यकृता, तथा-

> **यदेकं प्रक्रियाभेदैर्बहुधा प्रविभज्यते ।**
> **तद्व्याकरणमागम्य परं ब्रह्माधिगच्छति ।।** [2]

ISSN: 2348–2605 Impact Factor: 6.789 Volume 11-Issue 03, (July-Sep 2023)

इति भर्तृहरिणा "सिद्धे शब्दासम्बन्धे इति वार्तिके सर्वशब्दानां घटघटत्वादिरूपासत्योपाध्यवच्छिन्नं ब्रह्मैव तत्त्वमिति कैयटाच्च प्रयोजनमप्यधिगम्यते।

साधुशब्दज्ञानपूर्वकप्रयोगजन्यपुण्यवशाद् ज्ञानक्रमेण महान्तं शब्दात्मानं सर्वेषामन्तरवस्थितं साक्षात्कारेण स्वात्मतया अनुभावन् मोक्षं लभ्यते । अथवाऽन्तरवस्थितस्य शब्दस्वरूपस्य स्वात्मना सहाभेदतत्वज्ञो वर्णानुपूर्व्यादि- क्रमविशिष्टज्ञानपूर्वकं तत्क्रमपरिहारेण योगं निर्विकल्पकं लब्ध्वा मोक्षं प्राप्नोतीति तदाशयो वाक्यपदीये स्फुट: । तदेतेन प्रयोजनवत्ता सूचिता । तथा च सन्देहप्रयोजनयो विचारारम्भप्रयोजनक्यो: सत्वेन सति कारणे कार्यावश्यंभावाद् युक्त एवैतद्- विचारारम्भः ।

तत्र वैयाकरणा अखण्डवाक्यस्फोटं सिद्धान्तरूपेण तद्बोधकारणं निर्धारयन्ति। तदुक्तं -

**पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च ।**

**वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन ।।**[3]

ननु वर्णानां तत्समूहभूतं पदानाञ्चानुभवात् तदतिरिक्तस्य चाननुभावात् कथं तद्व्यतिरिक्तं वाक्यमिति न शङ्कनीयम्, पदं वाक्यमित्येकत्वावगाहिनी प्रतीतिरेकस्य वस्तुन उपारोहादेव जायमाना पदस्य वाक्यस्य चाखण्डतां प्रमापयति । न चैषा बुद्धिर्वर्णान् पदानि च विषयीकरोति तेषां बहुत्वेनैकत्वप्रतीतिव्याकोपप्रसङ्गात्, एकत्वबहुत्वयोरेकत्र पर्याप्तत्वस्यादृष्टत्वात् । तस्मात् सिद्धान्तेऽखाण्डवाक्यस्फोटोऽङ्गीक्रियते।

न चैकार्थबोधजनकत्वेन पदैकत्वमिति युक्तम्, अज्ञातार्थपदश्रवणेऽप्येकं पदमिति दर्शानात् । वर्णसमूहस्य पदस्य पदसमूहस्य वाक्यस्य चार्थवाचकत्वं सम्भावयितुमपि न शक्यते। तथाहि - समस्ता वर्णा वाचका: प्रत्येकं वा ? यदि प्रत्येकं वर्णा वाचका:, तदा पूर्वोच्चारितवर्णेनाभिमताप्रतीतिसम्भवे उत्तरोत्तरवर्णोच्चारणवैयर्थ्यापातप्रसङ्गात्।

अथ समस्ता वर्णा वाचका इति मन्यते, तदा वर्णानां क्रमेणोत्पत्तिविनाशशालिनां युगपदवस्थानासम्भवेन तेषां समूहस्यैवानिष्पत्तेः समस्तस्य वाचकत्वकथा वृथैव।

तस्मात् समस्तस्य प्रत्येकस्य वा वाचकत्वं खपुष्पायितम् । अतो बोध्यानुपपत्या तदर्थबोधजनको वर्णपदातिरिक्तो वाक्यस्फोट: स्वीकरणीय इति।

यदि चाभिव्यक्तोऽविबोधक इति मतम्, तदा किं प्रत्येकस्माद् वर्णात् स्फोटस्याभिव्यक्ति:, अथवा तत्समूहात्? नाव:, आद्येन वर्णेनैव स्फोटाभिव्यक्त्या वर्णान्तरोच्चारणवैयर्थ्यप्रसङ्गात् । अथा द्वितीयो विकल्प:, तदा वर्णानां क्षणप्रध्वंसितया विनाशात् कामप्येकदाऽवस्थानासम्भवेन तत्समूहस्य स्फोटाभिव्यन्जकत्वकल्पनाया दूरोत्सारितत्वात्। तथा चातिदरिद्रदम्पत्योर्वसनमिवैकैनापकृष्यमाणमपरं परिहरतीति न्यायोऽत्र सुतरामवकाशमासादयति। तथा चोक्तं श्लोकवार्तिके -

**यस्यानवयवः स्फोटो व्यज्यते वर्णबुद्धिभिः ।**

**सोऽपि पर्यनुयोगेन नैकेनापि विमुच्यते ।।**[4] इति।

अत्राभिधीयते प्रथमवर्णोच्चारणेन व्यक्तस्याऽपि स्फोटस्य स्फुटतरस्फुटतमप्रतीत्युपपत्तये द्वितीयादि-वर्णोच्चारणस्य सार्थक्यात् । तद्यथा रत्नपरीक्षणे परीक्षकाणां प्रथमदर्शने सर्वथा रत्नावभासो न भवति, अत: पौनःपुन्येन दृष्टिपात: । तदनन्तरमेव रत्नं विशुद्धमविशुद्धं चेति ते निर्णयन्ति । तथैवाद्याक्षरश्रवणेन

ISSN: 2348–2605 Impact Factor: 6.789 Volume 11-Issue 03, (July-Sep 2023)

स्फोटस्य व्यक्तावपि तस्य स्फुटतरस्फुटतमप्रतीतये इतरवर्णानामुच्चारणस्यावश्यकत्वान्न तेषां वैयर्थ्याशङ्का। तदुक्तम् -

**नादैराहितबीजायामन्त्येन ध्वनिना सह।**
**आवृत्तपरिपाकायां बुब्दौ शब्दोऽवधार्यते।।**[5]

न च पूर्वपूर्ववर्णानुभवजन्यसंस्कारसहितोऽन्तिमो वर्णोऽर्थं बोधयिष्यतीति न पूर्वस्फोटकल्पना ज्यायसीति वाच्यम्।

कोऽयं संस्कार ? किं स्मृतिकारणीभूतः, अथान्यः प्रोक्षणादिजन्यो ब्रीह्यादिनिष्ठ इव इष्यते। नद्यः, वासनारूप: स्मृतिहेतु: संस्कारः स्मरणेन फलेन कल्प्यमानशरीरो वर्णान्तरेणार्थबोधजनने सहकारीति कल्पना न शोभते, स्वभावभेदस्यायुक्तत्वात्। यो हि संस्कारी यविषयकानुभवेन जन्यते, संस्कार: स्वजनकस्यानुभावस्य विषये नियमादधातीति तस्य स्वभावः। विपरीतकल्पनेकन्यविषयकानुभावेन जातः संस्कारो विषयान्तरेऽपि धियमुत्पादयेत्। तथा च पूर्वानुभूतवर्णाहितसंस्कार पूर्वान् वर्णान् स्मारयिष्यति, न वर्णान्तरेण बोधे सहायोभूतोऽर्थोबोधयिष्यति।

एवं संस्कारसाहाय्येनान्तिमवर्णस्य बोध्यकत्वे तस्यार्थवत्वात् प्रतिपादिकत्वं स्यात्, ततश्च सुबाद्युत्पत्तिर्दोषः सम्भवेत्।

न द्वितीय, क्रमजातानां वर्णानामेकस्मिन् कालेऽवस्थानासम्भवेन सम्भूयैकस्य संस्कारस्योत्पादने सामर्थ्याभावात्।

यद्येवमुच्येत - वर्णानामनुभवैरहिता: संस्काराः सम्भूयैकां पूर्ववर्णस्मृतिं जनयिष्यन्तीति तदुपारोहिणो वर्णाः शाब्दधियं प्रवर्तयिष्यन्ति। मिलितानामपि कारणानामेकगोचरविज्ञानजनकत्वदर्शनात्। यथा चक्षुराद्यनपेक्ष: संस्कार: स्मरणकारणं संस्कारानपेक्षश्चक्षुरादिः प्रत्यक्षोत्पत्तिप्रयोजक: परं प्रत्यभिज्ञाया जनने चक्षुरादिः संस्कारमप्यपेक्षते, तथा संस्कारा मिलित्वैकां सकलवर्णविषयिणीं स्मृतिमुद्भावयिष्यन्ति तथा चार्थावगम इति किं नविछन्नम्। मैवम्, वर्णस्वरूपमात्रावगाहिनी स्मृतिर्नाभिमतम बोधयितुं क्षमते, क्रमवतां वर्णानामेव ज्ञानस्य तादृशार्थबोधाने सामर्थ्यात्। व्युत्क्रमेण वर्णानां स्मृत्युपारूढतया विपरीतार्थबोधने इष्टार्थ्यानवगमप्रसङ्गात्। अतो निरवयवो नित्यः स्फोटात्मकः शाब्दः शाब्दबोधहेतुरिति सिद्धम्।

अत एव चैकं पदम् एकं वाक्यमित्येकपदवाक्यगोचरा बुद्धिरप्याञ्जस्येनोपपन्ना भवति। तथा च समस्तेन व्यस्तेन वा वर्णेनार्थबोधानुपपत्या परशेषानुमानेनार्थापत्या वा स्फोटाख्यं शब्दवत्वं सिध्यति।

स चाय स्फोटो नित्यो निरवयवः शब्दब्रह्मापरनामधेयो जगदुपादानतया व्यवस्थितः। तदाह भर्तृहरिः

**अनादिनिधानं ब्रह्म शब्दतत्वं यदक्षरम्।**
**विवर्ततेऽभावेन प्रक्रिया जगतो यतः।।**[6] इति।

अयमर्थ: - उत्पत्तिविनाशरहितं सर्वविकल्पातीतम् अक्षराणां निमित्ततया निमित्तनिमित्तिनोरभेदाद् अक्षरं न तु अविनाशीत्यर्थः, अनादिनिधनेनैव तदप्रतीत्या पुन: प्रतिपादने पौनरुक्त्यापत्तेः। इदमेव च शब्दब्रह्माभावेन विवर्तते। स्वरूपादप्रच्युतं सद् अरूपतया प्रतीयते। एकस्य तत्वात् स्वरूपादप्रच्युतस्य भेदानुकारेणासत्यविभक्तान्यरूपोपग्राहिता विवर्त:। यथा स्वप्न एको विज्ञानात्मा घटपटाद्यात्मना प्रतिभासते। न च तस्य विज्ञानात्मनोऽल्पीयानपि विकारोऽनुभूयते, तथौव स्वरूपधानमन्तरेणैव स्वामितया

ISSN: 2348–2605 Impact Factor: 6.789 Volume 11-Issue 03, (July-Sep 2023)

प्राक्तिभूतयाऽविद्यया शब्दब्रह्मैव विविधात्मनाऽथाकारेण प्रतिभासते। यतः शब्दरूपाद् ब्रह्मणो जगतः प्रक्रिया आविर्भाव इति।

अद्वितीयं प्रकाशात्मकं शब्दब्रह्मैवानाद्यविद्यावासनोपप्लवमानभेदमर्थभावेन विवर्तते, न तु वाचकात् पृथग्भतं वाच्यं किञ्चिदप्यस्ति। यत् किञ्चत् प्रतिभासते, तत्सर्वं काल्पनिकम् आविद्यिकम्। तत्र सर्वत्र शब्द एव तत्वम्, सर्वत्र वागुरूपताया अनपायात्। तदुक्तं वाक्यपदीये

**वागुरूपता वेदुत्क्रमामेदवबोधास्य शाश्वती।**

**न प्रकाशाः प्रकाशेत सा हि प्रत्यवमर्शिनी॥**[7] इति।

यथा प्रकाशकत्वमग्नेः स्वरूपम्, यथा वा चैतन्यम् अन्तर्यामिणः, तथा सर्वं ज्ञानमपि वागुरूपतामुगतम्। याप्यसन्चैतितावस्था सुषण्तिरूपा, तस्यामप्यवस्थायां सूक्ष्मो वागधर्मोऽभ्यावर्तत इत्यादि स्वोपज्ञव्याख्यायां स्पष्टम्। अवबोधस्य ज्ञानस्य सार्वकालिकी वागुरूपता वाक्त्वरूपितता उत्क्रामेत् उद्गच्छेत् तदा प्रकाशो ज्ञानं न प्रकाशेत, अर्थन्तरं ज्ञानं परस्याज्ञेयं प्रकाशकस्य शब्दस्याभावात्। अग्राह्यमेव परस्य स्यात्। यस्मात् सा वागुरूपता प्रत्यवमर्शिनी शब्देन ज्ञानाभिलाष एवात्र प्रत्यवमर्शः, स अस्ति अस्या इति तादृशी। शब्दोपग्राहितां विना न ज्ञानस्याभिलाप इति सारम्।

तथाहि भर्तृहरिः

**अर्थक्रियासु वाक् सर्वान् समीयति देहिनः।**

**तदुत्क्रान्तेर्विसंज्ञोऽयं दृश्यते काष्ठकुड्यवत्॥**[8] इति।

वागेव चैतन्यम्, अक्रियासु प्रयोजनवतीषु क्रियासु, सर्वान् देहिनः प्राणिनः, समीहयति चेष्टयति। वागुरूपचैतन्यस्य विगमे शरीरो काष्ठकुड्यवद्विसंज्ञः प्रवृत्तिरहितो दृश्यते। यावद् वागुरूपता अनुवर्तते तावदेव सुखदुःखादेः संवेदनं भवति। एवमेव भग्नक्षतसंरोहणादिना तस्मादिष्वपि चैतन्यं वागूरूपमस्ति।

सेयं वाक् पश्यन्ती, मध्यमा, वैखरीभेदेन त्रैविध्यमुपगता। तथा हि-

**अविभागा तु पश्यन्ती सर्वतः संहृतक्रमा।**

**स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनपायिनी॥**

ग्राह्यग्राहकभोदक्रमरहिता स्वप्रकाशा संविद्रूपा वाक् पश्यन्तीत्युच्यते।

**केवलं बुद्ध्युपादाना क्रमरूपानुपातिनी।**

**प्राणवृत्तिमतिक्रम्य मध्यमा वाक् प्रवर्तते।**

**स्थानेषु विवृते व वायौ कृतवर्णपरिग्रहा।**

**वैखरी वाक् प्रयोक्तृणां प्राणवृत्तिनिबन्धना॥**

विखरो देहेन्द्रियसङ्गातः, तत्र भवा वैखरी, स्थानप्रयत्नक्रमेण व्यज्यमानककारादिवर्णसङ्घातात्मिका वाग् वैखरीत्युच्यते। भर्तृहरिमतेन वाचां त्रैविध्यं प्रदर्शितम्।

यत्तु **"तद्वारमपवर्गस्य"**[9] इति कारिकाया व्याख्यावसरे स्वोपज्ञव्याख्यायां प्रत्यस्तसर्वविकारोल्लेखमात्रां परां प्रकृतिं प्रतिपद्यत इति प्रतिपादितम्, तत्तु पश्यन्त्या एव परात्मकभेदकथनपरतया योजनीयम्, न तु तस्या अपरो भेदः प्रत्येतव्यः। "पश्यन्ती" एव प्रकृष्टरूपा परा वाक्।

ISSN: 2348–2605 Impact Factor: 6.789 Volume 11-Issue 03, (July-Sep 2023)

परापरभेदेन "पश्यन्ती" एव द्वैविध्यमुपगच्छति। योगिगम्यविभागवती पश्यन्ती, अविभागसंविद्रूपा परा वाग इति । शिवदृष्टावपि -

**इत्याहुस्ते परं ब्रह्म यदनादि तथाऽयम् ।**

**तदक्षरं शब्दरूपं पश्यन्ती च परा हि वाक् ।।** इति ।

"वाचं धेनुमुपासीत", "वाग् वै समुद्रो न वै वाक् क्षीयते न समुद्रः क्षीयते", "यद् वै वाग्-नाभाविष्यत्, न धर्मो नाधर्मो व्यज्ञपयिष्यत् । न सत्यं नानृतं वागेवैतत्सत्यं विज्ञापयति वाचमुपास्व" इति ।

तदेतेन वाक्यपदीयानुसारेण पश्यन्तीरूपात्मनो वाचः शब्दब्रह्मणो नित्यत्वं जगदुपादनत्वं सिद्धम् ।

अन्यच्च -

**द्वे ब्रह्मणी वेदितव्ये परश्चापरमेव च ।**

**शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ।।**

इत्यादिसन्दर्भेण शब्दब्रह्मणोऽनुत्पत्तिधर्मकत्वं न सिध्यति, किन्तु उत्पत्तिमत्वं प्रतीयते । तन्त्रशास्त्रस्य प्रभावोऽस्मिन् मते प्रतिभाति ।

भर्तृहरिमते अनादि निधनं ब्रह्मेत्यादिना शब्दब्रह्मण उत्पत्ति- विनाशराहित्यं प्रतीयत इति परस्परं विरोधः, प्रवाहरूपानादित्वं मत्वा परिहर्तुं शक्यते । प्रवाहरूपेणानादित्वमनन्तत्वमिह विवक्षितम् । वस्तुतः "स्वरूपज्योति- रेवान्तः परावागनपायिनी "[10] इति कारिकया परस्या वाचोऽनपायित्वमेव लभ्यते । एवं सर्वस्य जगतः प्रकृतित्वेनापि शब्दतत्वस्य नित्यत्वं सिध्यति । सर्वमपि विकारजातं प्रकृत्यनुगामि दृश्यते । यथा घटकुण्डलादय विकारा मृत्सुवर्णान्विता भवन्ति । तथा चोक्तं महाभाष्यकृता - " मृत्क्याविदाकृत्या पिण्डो भवति, पिण्डाकृतिमुपमृद्य घाटिकाः क्रियन्ते, घाटिकाकृतिमुपमृद्य कुण्डिकाः क्रियन्ते । एवं सुवर्णो कयाचिदाकृत्या युक्तं पिण्डो भवति, पिण्डाकृतिमुपमृद्य स्वकाः क्रियन्ते, स्वकाकृतिमुपमृद्य कटकाः क्रियन्ते । पुनरावृत्तः सुवर्णपिण्डः पुनरपरयाऽऽकृत्या युक्तं खादिराङ्गारसवर्णो कुण्डले भवतः । आकृतिरन्या चान्या भवति । द्रव्यं पुनस्तदेव । आकृत्युपमर्देन द्रव्यमेवावशिष्यते"[11] इति । अनेन संदर्भेण प्रकृतैर्नित्यत्वमवधार्यते ।

"वाचारम्भणं विकारो नामध्येयं मृत्तिकेत्येव सत्यम्"[12] इति श्रुतिरपि प्रकृतेः सत्यत्वं प्रमाणयति ।तथैवेदं जगदपि शब्दोपग्राह्यतया शब्दानुगतत्वेन विकृतिरूपेण भासमानमसत्यं प्रकृतिरूपेण प्रतीयमानं शब्दतत्वं सत्यमिति । तथा चोक्तं भर्तृहरिणा - "आम्नातः सर्वविधासु वागेव प्रकृतिः परा" इति ।

न च भिन्नेन्द्रियग्राह्याणां भिन्नस्वरूपाणां विषयाणां कथमेकेन्द्रियग्राह्यता ? कां वाऽभिन्नस्वरूपता स्यादिति वाच्यम्, अघटितघटनापटीयस्या मायाया विलासेन सर्वविद्याविरोधा काया दूरापास्तत्वात् । अचिन्त्यापरिमेशक्तिः सा किं किं न साधयितुं समर्था, सर्वविधकार्यसम्पादनसामर्थ्यावधारणात् । तस्मात् सर्वप्रकृतिभूतस्य शब्दब्रह्मणो विवर्तः संसार इति युक्तः पन्थाः । भिन्नभिन्नरूपतया दृष्टानामपि पदार्थानां शब्दानुविद्धतयाशब्दोपग्राह्यतया च शब्दात्मकत्वम् ।

अयमाशयः - सर्वोऽपि प्रत्ययोऽनुभूयमानः शब्दोल्लेखपूर्वक एव ।

जातस्य प्रत्ययस्य बोधानं शब्दोल्लेखामन्तरा न सम्भवति । सुरगुरुणाऽपि शब्दोल्लेखमकुर्वता प्रत्ययाकारः केनाप्युपायेन स्फुटीकर्तुं न शक्यते, किं पुनर्मादृशः। प्रतिपत्ताऽपि पुरूषान्तरेण वेद्यमशब्दोपग्रहेणैवावगच्छति । अनुल्लिखितशब्द-कस्याप्राप्तप्रकाशास्वभावस्यानुत्पन्ननिर्विशेषत्वात्।

ISSN: 2348–2605 Impact Factor: 6.789 Volume 11-Issue 03, (July-Sep 2023)

विषयविशेषपरामर्शमुपितवपुषि प्रत्यये प्रत्ययात्मकतैव नास्ति । अत एव बालकानां स्फुटशब्दोच्चारण-विरहितायां वेदनं न कश्चित् प्रमिणोति, किमनेन ज्ञातं किं वा विवक्षुरयमिति ? तदिदं सिद्धं शब्दोन्मेषेणैव भासमानत्वं लिखिलानां ज्ञानानाम् । तदुक्तं भर्तृहरिणा-

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ।।"**[13] इति ।

एवञ्च शब्दस्वरूपप्रकाशानुवेद्यत्वं सर्वेष्ठां प्रत्ययानां मन्तव्यम्। अन्यथा सर्वे प्रत्ययाः प्रकाशशून्यतया असमर्थाविषयप्रकाशने भवेयुरिति सर्वो लोको मूकायित: स्यात्। तथा चानेन प्रकारेण सर्वा अपि संविदः शब्दविशेषानुविद्वा एव भासमानाः साधयन्तीदं यच्छब्दविशिष्ट एवार्थो जात्याद्यवच्छिन्नविषयावभासिनो ज्ञानस्य विषयतया प्रतिपद्यते । शब्दोपरागं विना न कश्चित् प्रत्यय: पदमायातुं प्रभवति ।

कीदृशं ज्ञानं कोऽयमर्थ: ? किं वाऽस्य नामेति पृष्टे गौरिति ज्ञानम्, गौरयमर्थः, गौरिति नाम इत्येवं शब्दोपग्रहेणैवोत्तरयति । तथा च सर्वो व्यवहारः शब्दोपारूढ एव प्रचलतीति सर्वे विषया: शब्दस्य विवर्तभूता:, अत एव शब्दानुविद्धा: । अतः परा नान्या काचन विधया । यया "सन् घट:", "सन् पटः" इत्यादिप्रतीतौ सत्वानुगमेन सतो ब्रह्मण एवायं संसारी विवर्त:, तथाऽस्मिन्नकल्पेऽप्यनुसन्धेयम्।

न चैवं शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छतीति सिद्वान्तव्याकोपः। शब्दब्रह्मण एव नित्यत्वे जगदुपादानत्वे चान्यस्य परब्रह्मणः सत्वे प्रमाणाभावादिति वाच्यम् ।

" शब्दब्रह्मणि निष्णात: " कृताभ्यासः परम् अद अभ्यासप्रकर्णादनन्तरं स्वत एव ब्रह्माधिगतं भवति । तथा च शब्दब्रह्मातिरिक्तस्य परस्य ब्रह्मणः सत्वं नानेन बोध्यते, येन विरोधा का लब्धा भूमिः प्रसरेत् । "द्वे ब्रह्मणी वेदितव्ये" इत्यत्राप्यौपाधिकं भेदमादाय भेदव्यपदेशो न विरोधापादक इति। तस्माच्छब्दात्मकस्य ब्रह्मण एवं मायाशंबलितस्येक्षणाद्या वृत्तय इति शोभनः पन्धाः।

तदयं निष्कर्ष: - वर्णानां क्षणिकत्वेन विनश्वरतया वर्णसमूहस्य पदस्य, पदसमूहात्मकस्य वाक्यस्य च दुर्घटतयाऽकामेनापि तद्वाक्यितो नित्यः शब्दोऽबोधाक्त्या मन्तव्यः। स एव च स्फुटत्याऽस्माद् इति व्युत्पत्त्या स्फोट इत्युच्यते। अयमेव च तत्तदनिरूपिताया वृत्तेराश्रयः। वर्णसमूहात्मकस्य पदस्य वक्तुमशक्यतया तस्य वृत्याश्रयत्वानुपपत्तेः।

तथा च हृदयदेशामागच्छता वायुनाभिव्यक्तो वो मध्यमा वाक् स्फोट:, कण्ठदेशस्थो न वायुनाऽभिव्यक्तेन वैखरीनादेन वीचितरङ्गन्यायमनुसृत्यान्यथा वा श्रोतु : श्रोत्रन्द्रियप्रविष्टेन प्राप्तवर्णपरिग्रहो हृदेशास्था: स्फोटो वक्तुः श्रोतुश्चाभिव्यज्यते । वक्तुः हृदये स्थितः स्फोट: सन्निहितः, अत एव शीघ्रं व्यक्तोऽमवगमयति । श्रोतुश्च विलम्बेन स्फोटाभिव्यक्त्याऽवगमः पश्चाद् भवतीत्यनुभवसिद्धम्। तदुक्तं मन्जूषायाम् "केनचिद् घटमानयति वैखरीनादः प्रयुक्तः। स केनचिच्छश्रोत्रेन्द्रियेण गृहीतः। स नाद इन्द्रियद्वारा बुद्हृद्गत: सन्नर्थ बोधं शब्दं स्वनिष्ठकत्वादिना व्यञ्जयति, तस्माद्बोध इति । इत्येवमभ्युपगम्य स्फोटस्यार्थबोधकत्वं स्वीक्रियत इति न कश्चित् कलेशोऽपि ।

यथा दर्पणे तत्पुरोवर्तिपदागता धर्मा भासन्ते, तथाऽत्रापि स्फोटात्मके शब्दे ध्वनिगता धर्माः कत्वखत्वादिरूपा भासन्ते, इत्येकोऽखण्डोपि स्फोटो व्यञ्जकरुषितो नानात्मकः प्रतीयते। वस्तुतस्तु न स तादृशोऽनेकरूपः, न च स्वरूपेण च व्यज्यते, वर्णस्वरूषितस्यैवाभिव्यक्तिस्वीकारात् ।

ISSN: 2348–2605 Impact Factor: 6.789 Volume 11-Issue 03, (July-Sep 2023)

"मध्यमानादोऽर्थवाचकस्फोटात्मकशब्दव्यकम्" इति परमलघुमञ्जूशादर्शनाद् मध्यमानादातिरिक्तः कश्चिदान्तरो नित्यो निरवयवः शब्दः स्फोटपदेनोच्यत इत्याञ्जस्येन प्रतिभाति ।

यद्यपि वेदे स्फोटशब्देन वाकतत्त्वव्यवहारो न दृश्यते, तथापि वाचां नित्यत्वाखण्डत्वसंहृतक्रमरूपत्वादिना व्यवहारः स्फोटात्मकमेव शब्दं लक्ष्यीकरोति ।

स्फोटशब्दप्रयोगः पृथममष्टाध्याय्याम् "अवङ् स्फोटायनस्य"[14] इति सूत्रे दृश्यते । स्फोटायनं यस्येत्येतादृशं व्याख्यानं कृत्वा स्फोटप्रतिपादनपरो वैयाकरणाचार्य इति पदमशर्यामुक्तम् । वैयाकरणनागेः स्फोटायनर्मतम् इति नागेशभट्टेनापि स्फोटवादे उक्तम् । "सिद्धे शब्दार्थसम्बन्धे"[15] इति भाष्य-वार्तिकालोचनेनापि तस्य नित्यत्वं दृढीभवति।

**सन्दर्भ:**

1. महाभाष्यम्, पस्प. पृ. 19
2. महाभाष्यम्, पस्प. पृ. 19
3. वाक्यपदीयम्, 1/71
4. श्लोकवार्तिकम्, स्फोटवादे, 91
5. वाक्यपदीयम्,1/84
6. वाक्यपदीयम्,1/1
7. वाक्यपदीयम्,1/124
8. वाक्यपदीयम्,1/127
9. वाक्यपदीयम्,1/14
10 .वाक्यपदीयम्,पृ. 314
11. महाभाष्यम्, पस्पाह्निकम्, पृ. 63
12. वाक्यपदीयम्,1/123
13. वाक्यपदीयम्,1/123
14. अष्टाध्यायी, 6/1/123
15. महाभाष्यम्, पस्पाह्निकम्, पृ. 59

**प्रो. धनीन्द्रकुमारझा:**
**आचार्य:, व्याकरणशास्त्रविद्याशाखा:**
**केन्द्रीयसंस्कृतविश्वविद्यालय**
**लखनऊपरिसर:, लखनऊ**